ध्यान श्लोकाः प्रार्थना श्लोकाः च

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

गणानामधिपश्चण्डो गजवक्त्रस्त्रिलोचनः ।
प्रीतो भवतु मे नित्यं वरदाता विनायकः ॥

गजाननं गणपतिं गुणानामालयं परम् ।
तं देवं गिरिजासूनुं वन्देऽहम् अमरार्चितम् ॥

गजवदनम् अचिन्त्यं तीक्ष्णदन्तं त्रिनेत्रम्
बृहदुदरम् अशेषं पूतरूपं पुराणम् ।
अमरवरसुपूज्यं रक्तवर्णं सुरेशम्
पशुपतिसुतम् ईशं विघ्नराजं नमामि ॥

हरिहरविरिञ्चिवासवाद्यैः अपि कृतपूजमुपक्रमे क्रियायाः
सकलदुरितहरम् अम्बिकायायाः प्रथमसुतं प्रणमामि विघ्नराजम् ॥

ध्यायेन्नित्यं गणेशं परमगुणयुतं ध्यानसंस्थं त्रिनेत्रम्
एकं देवं त्वनेकं परमसुखयुतं देवदेवं प्रसन्नम् ।
शुण्डादण्डाढ्यगण्डोद्गलितमदजलोल्लोलमत्तालिमालं
श्रीमन्तं विघ्नराजं सकलसुखकरं श्रीगणेशं नमामि ॥
बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।
ध्येयो वल्लभया सपद्मकरया श्लिष्टोज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नो विशिष्टार्थदः ॥

विघ्नेश्वर अष्टोत्तर शतनाम स्तोत्रं

देव्युवाच

अष्टोत्तरशतं नाम्नां महागनपतेर्वद

शिव उवाच

ऋषिरस्य गृत्समदो छन्दोनुष्टुप् प्रकीर्तितः

सहस्रनामवत्सर्वं न्यासध्यानादिकं स्मृतं

विनायको विघ्नराजो गौरीपुत्रो गणेश्वरः ।

स्कन्दाग्रजोऽव्ययो पूतो दक्षोऽध्यक्षो द्विजप्रियः ॥ १॥

अग्निगर्वच्छिदिन्द्रश्रीप्रदो वाणीप्रद्रोव्ययः (वाणीप्रियोव्ययः)।

सर्वसिद्धिप्रदश्शर्वतनयः शर्वरीप्रियः ॥ २॥

सर्वात्मकः सृष्टिकर्ता देवोऽनेकार्चितश्शिवः ।

सिद्धिबुद्धिप्रियश्शान्तो ब्रह्मचारी गुणेश्वरः ॥ ३॥

द्वैमात्रेयो मुनिस्तुत्यो भक्तविघ्नविनाशनः ।

एकदन्तश्चतुर्बाहुश्चतुरश्शक्तिसंयुतः ॥ ४॥

लम्बोदरश्शूर्पकर्णो हरिर्ब्रह्म विदुत्तमः ।

कालो ग्रहपतिः कामी सोमसूर्याग्निलोचनः ॥ ५॥

पाशाङ्कुशधरश्चण्डो गुणातीतो निरञ्जनः ।

अकल्मषस्स्वयंसिद्धस्सिद्धार्चितपदाम्बुजः ॥ ६॥

बीजपूरफलासक्तो वरदश्शाश्वतः कृती ।

विद्वत्प्रियो वीतभयो गदी चक्रीक्षुचापधृत् ॥ ७॥

श्रीदोऽजोत्पलकरः श्रीपतिः स्तुतिहर्षितः ।

कुलाद्रिभेत्ता जटिलः कलिकल्मषनाशनः ॥ ८॥

चन्द्रचूडामणिः कान्तः पापहारी समाहितः ।

आश्रितश्श्रीकरस्सौम्यो भक्तवाञ्छितदायकः ॥ ९॥

विष्णुः कैवल्यसुखदस्सच्चिदानन्दविग्रहः ।

चिन्तामणिद्वीपपतिः परमात्मा गजाननः ||

ज्ञानी दयायुतो दान्तो ब्रह्मद्वेषविवर्जितः ॥१०॥

प्रमत्तदैत्यभयदः श्रीकण्ठो विबुधेश्वरः ।

रमार्चितोविधिर्नागराजयज्ञोपवीतवान् ॥११॥

स्थूलकण्ठः स्वयङ्कर्ता सामघोषप्रियो वरः ।

स्थूलतुण्डोऽग्रणीर्धीरो वागीशस्सिद्धिदायकः ॥ १२॥

दूर्वाबिल्वप्रियोऽव्यक्तमूर्तिरद्भुतमूर्तिमान् ।

शैलेन्द्रतनुजोत्सङ्गखेलनोत्सुकमानसः ॥ १३॥

स्वलावण्यसुधासारजितमन्मथविग्रहः ।

समस्तजगदाधारो मायी मूषकवाहनः ॥१४॥

हृष्टस्तुष्टः प्रसन्नात्मा सर्वसिद्धिप्रदायकः ।

अष्टोत्तरशतेनैवं नाम्नां विघ्नेश्वरं विभुं ॥ १५॥

तुष्टाव पार्वतीकान्तः त्रिपुरं हन्तुमुद्यतः ।

यः पूजयेदनेनैव भक्त्या सिद्धिविनायकम् ॥१६॥

दूर्वादलैर्बिल्वपत्रैः पुष्पैर्वा चन्दनाक्षतैः ।

(दूर्वाङ्कुरैश्शमीपत्रैः मन्दारादिसुमैरापि ।)

सर्वान्कामानवाप्नोति सर्वविघ्नैः प्रमुच्यते (विघ्नस्तस्य न जायते) ॥

इति श्रीविघ्नेश्वराष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।

श्रीसिद्धिविनायकाष्टोत्तरशतनामावलिः

1. ॐ विनायकाय नमः ।
2. ॐ विघ्नराजाय नमः ।
3. ॐ गौरीपुत्राय नमः ।
4. ॐ गणेश्वराय नमः ।
5. ॐ स्कन्दाग्रजाय नमः ।
6. ॐ अव्ययाय नमः ।
7. ॐ पूताय नमः ।
8. ॐ दक्षाय नमः ।
9. अध्यक्षाय नमः ।
10. ॐ द्विजप्रियाय नमः ।
11. ॐ अग्निगर्वच्छिदे नमः । १०
12. ॐ इन्द्रश्रीप्रदाय नमः ।
13. ॐ वाणीप्रियाय नमः ।
14. ॐ अव्ययाय नमः ।
15. ॐ सर्वसिद्धिप्रदाय नमः ।
16. ॐ शर्वतनयाय नमः ।
17. ॐ शर्वरीप्रियाय नमः ।
18. ॐ सर्वात्मकाय नमः ।
19. ॐ सृष्टिकर्त्रे नमः ।
20. ॐ देवाय नमः ।
21. अनेकार्चिताय नमः ।
22. ॐ शिवाय नमः ।
23. ॐ सिद्धिबुद्धिप्रियाय नमः ।
24. ॐ शान्ताय नमः ।
25. ॐ ब्रह्मचारिणे नमः ।
26. ॐ गुणेश्वराय नमः ।
27. ॐ द्वैमातुराय नमः ।
28. ॐ मुनिस्तुत्याय नमः ।
29. ॐ भक्तविघ्नविनाशनाय नमः ।

30. ॐ एकदन्ताय नमः ।
31. ॐ चतुर्बाहवे नमः ।
32. ॐ चतुराय नमः ।
33. ॐ शक्तिसंयुताय नमः ।
34. ॐ लम्बोदराय नमः ।
35. ॐ शूर्पकर्णाय नमः ।
36. ॐ हरये नमः ।
37. ॐ ब्रह्मविदुत्तमाय नमः ।
38. ॐ कालाय नमः ।
39. ॐ ग्रहपतये नमः ।
40. ॐ कामिने नमः ।
41. ॐ सोमसूर्याग्निलोचनाय नमः ।
42. ॐ पाशाङ्कुशधराय नमः ।
43. ॐ चण्डाय नमः ।
44. ॐ गुणातीताय नमः ।
45. ॐ निरञ्जनाय नमः ।
46. ॐ अकल्मषाय नमः ।
47. ॐ स्वयंसिद्धाय नमः ।
48. ॐ सिद्धर्चितपदाम्बुजाय नमः ।
49. ॐ बीजापूरफलासक्ताय नमः ।
50. ॐ वरदाय नमः ।
51. ॐ शाश्वताय नमः ।
52. ॐ कृतिने नमः ।
53. ॐ विद्वत्प्रियाय नमः ।
54. ॐ वीतभयाय नमः ।
55. ॐ गदिने नमः ।
56. ॐ चक्रिणे नमः ।
57. ॐ इक्षुचापधृते नमः ।
58. ॐ श्रीदाय नमः ।
59. ॐ अजाय नमः ।
60. ॐ उत्पलकराय नमः ।
61. ॐ श्रीपतये नमः ।
62. ॐ स्तुतिहर्षताय नमः ।
63. ॐ कुलाद्रिभेत्त्रे नमः ।

64. ॐ जटिलाय नमः ।
65. कलिकल्मषनाशनाय नमः ।
66. ॐ चन्द्रचूडामणये नमः ।
67. ॐ कान्ताय नमः ।
68. ॐ पापहारिणे नमः ।
69. ॐ समाहिताय नमः ।
70. ॐ आश्रितश्रीकराय नमः ।
71. ॐ सौम्याय नमः ।
72. ॐ भक्तावाञ्छितदाय नमः ।
73. ॐ विष्णवे नमः ।
74. ॐ केवल्यसुखदाय नमः ।
75. ॐ सच्चिदानन्दविग्रहाय नमः ।
76. ॐ चिन्तामणिद्वीपतये नमः ।
77. ॐ परमात्मने नमः ।
78. ॐ गजाननाय नमः ।
79. ॐ ज्ञानिने नमः ।
80. ॐ दयायुताय नमः ।
81. ॐ दान्ताय नमः ।
82. ॐ ब्रह्मद्वेषविवर्जिताय नमः ।
83. ॐ प्रमत्तदैत्यभयदाय नमः ।
84. ॐ श्रीकण्ठाय नमः ।
85. ॐ विबुधेश्वराय नमः ।
86. ॐ रामार्चिताय नमः ।
87. ॐ विधये नमः ।
88. ॐ नागरायज्ञोपवीतवते नमः ।
89. ॐ स्थूलकण्ठाय नमः ।
90. ॐ स्वयंकर्त्रे नमः ।
91. ॐ सामघोषप्रियाय नमः ।
92. ॐ वराय नमः ।
93. ॐ स्थूलतुण्डाय नमः ।
94. ॐ अग्रण्ये नमः ।
95. ॐ धीराय नमः ।
96. ॐ वागीशाय नमः ।
97. ॐ सिद्धिदायकाय नमः ।

98. ॐ दूर्वाबिल्वप्रियाय नमः ।
99. ॐ अव्यक्तमूर्तये नमः ।
100. ॐ अद्भुतमूर्तिमते नमः ।
101. ॐ शैलेन्द्रतनयोत्सङ्गखेलनोत्सुखमानसाय नमः ।
102. ॐ स्वलावण्यसुधासारजितमन्मथविग्रहाय नमः ।
103. ॐ समस्तजगदाधाराय नमः ।
104. ॐ मायिने नमः ।
105. ॐ मूषकवाहनाय नमः
106. ॐ हृष्टतुष्टाय नमः ।
107. ॐ प्रसन्नात्मने नमः ।
108. ॐ सर्वसिद्धिप्रदायकाय नमः ।

॥ इति श्रीसिद्धिविनायकाष्टोत्तरशतनामावलिः ॥

dhyāna ślokāḥ prārthanā ślokāḥ ca

abhīpsitārthasiddhyarthaṃ pūjito yaḥ surairapi .
    sarvavighnacchide tasmai gaṇādhipataye namaḥ ..

gaṇānāmadhipaścaṇḍo gajavaktrastilocanaḥ .
    prīto bhavatu me nityaṃ varadātā vināyakaḥ ..

gajānanaṃ gaṇapatiṃ guṇānāmālayaṃ param .
    taṃ devaṃ girijāsūnuṃ vande'ham amarārcitam ..

gajavadanam acintyaṃ tīkṣṇadantaṃ trinetram
    bṛhadudaram aśeṣaṃ pūtarūpaṃ purāṇam .
amaravarasupūjyaṃ raktavarṇaṃ sureśam
    paśupatisutam īśaṃ vighnarājaṃ namāmi ..

hariharaviriñcivāsavādyaiḥ api kṛtapūjamupakrame kriyāyāḥ
sakaladuritaharam ambikāyāyāḥ prathamasutaṃ praṇamāmi vighnarājam ..

dhyāyennityaṃ gaṇeśaṃ paramaguṇayutaṃ dhyānasaṃsthaṃ trinetram
    ekaṃ devaṃ tvanekaṃ paramasukhayutaṃ devadevaṃ prasannam .
śuṇḍādaṇḍāḍhyagaṇḍodgalitamadajalollolamattālimālaṃ
    śrīmantaṃ vighnarājaṃ sakalasukhakaraṃ śrīgaṇeśaṃ namāmi ..

bījāpūragadekṣukārmukarujācakrābjapāśotpala- vrīhyagrasvaviṣāṇaratnakalaśapro
dyatkarāmbhoruhaḥ .
dhyeyo vallabhayā sapadmakarayā śliṣṭojvaladbhūṣayā
viśvotpattivipattisaṃsthitikaro vighno viśiṣṭārtthadaḥ ..

vighneśvara aṣṭottara śatanāma stotraṃ

devyuvāca
aṣṭottaraśataṃ nāmnāṃ mahāganapatervada

śiva uvāca
ṛṣirasya gṛtsamado chandonuṣṭup prakīrtitaḥ
sahasranāmavatsarvaṃ nyāsadhyānādikaṃ smṛtaṃ

vināyako vighnarājo gaurīputro gaṇeśvaraḥ .
skandāgrajo'vyayo pūto dakṣo'dhyakṣo dvijapriyaḥ .. 1..

agnigarvacchidindraśrīprado vāṇīpradrovyayaḥ (vāṇīpriyovyayaḥ).
sarvasiddhipradaśśarvatanayaḥ śarvarīpriyaḥ .. 2..

sarvātmakaḥ sṛṣṭikartā devo'nekārcitaśśivaḥ .
śuddho buddhipriya(siddhibuddhipriya)śśānto brahmacārī guṇeśvaraḥ .. 3..

dvaimātreyo munistutyo bhaktavighnavināśanaḥ .
ekadantaścaturbāhuścaturaśśaktisaṃyutaḥ .. 4..

lambodaraśśūrpakarṇo harirbrahma viduttamaḥ .
kālo grahapatiḥ kāmī somasūryāgnilocanaḥ .. 5..

pāśāṅkuśadharaścaṇḍo guṇātīto nirañjanaḥ .
akalmaṣassvayaṃsiddhassiddhārcitapadāmbujaḥ .. 6..

bījapūraphalāsakto varadaśśāśvataḥ kṛtī .
vidvatpriyo vītabhayo gadī cakrīkṣucāpadhṛt .. 7..

śrīdo'jotpalakaraḥ śrīpatiḥ stutiharṣitaḥ .
kulādribhettā jaṭilaḥ kalikalmaṣanāśanaḥ .. 8..

candracūḍāmaṇiḥ kāntaḥ pāpahārī samāhitaḥ .
āśritaśśrīkarassaumyo bhaktavāñchitadāyakaḥ .. 9..

viṣṇuḥ kaivalyasukhadassaccidānandavigrahaḥ .
cintāmaṇidvīpapatiḥ paramātmā gajānanaḥ ||
jñānī dayāyuto dānto brahmadveṣavivarjitaḥ ..10..

pramattadaityabhayadaḥ śrīkaṇṭho vibudheśvaraḥ .
ramārcitovidhirnāgarājayajñopavītavān ..11..

sthūlakaṇṭhaḥ svayaṅkartā sāmaghoṣapriyaḥ paraḥ .
sthūlatuṇḍo'graṇīrdhīro vāgīśassiddhidāyakaḥ .. 12..

dūrvābilvapriyo'vyaktamūrtiradbhutamūrtimān .
śailendratanujotsaṅgakhelanotsukamānasaḥ .. 13..

svalāvaṇyasudhāsāro jitamanmathavigrahaḥ .
samastajagadādhāro māyī mūṣakavāhanaḥ ..14..

hṛṣṭastuṣṭaḥ prasannātmā sarvasiddhipradāyakaḥ .
aṣṭottaraśatenaivaṃ nāmnāṃ vighneśvaraṃ vibhuṃ .. 15..

tuṣṭāva pārvatīkāntaḥ tripuraṃ hantumudyataḥ .
yaḥ pūjayedanenaiva bhaktyā siddhivināyakam ..16..

dūrvādalairbilvapatraiḥ puṣpairvā candanākṣataiḥ .
(dūrvāṅkuraiśśamīpatraiḥ mandārādisumairāpi .)
sarvānkāmānavāpnoti sarvavighnaiḥ pramucyate (vighnastasya na jāyate) ..

iti śrīvighneśvarāṣṭottaraśatanāmastotraṃ sampūrṇam .

śrīsiddhivināyakāṣṭottaraśatanāmāvaliḥ

1. oṃ vināyakāya namaḥ .
2. oṃ vighnarājāya namaḥ .
3. oṃ gaurīputrāya namaḥ .
4. oṃ gaṇeśvarāya namaḥ .
5. oṃ skandāgrajāya namaḥ .
6. oṃ avyayāya namaḥ .
7. oṃ pūtāya namaḥ .
8. oṃ dakṣāya namaḥ .
9. adhyakṣāya namaḥ .
10. oṃ dvijapriyāya namaḥ .
11. oṃ agnigarvacchide namaḥ .
12. oṃ indraśrīpradāya namaḥ .
13. oṃ vāṇīpriyāya namaḥ .
14. oṃ avyayāya namaḥ .
15. oṃ sarvasiddhipradāya namaḥ .
16. oṃ śarvatanayāya namaḥ .
17. oṃ śarvarīpriyāya namaḥ .
18. oṃ sarvātmakāya namaḥ .
19. oṃ sṛṣṭikartre namaḥ .
20. oṃ devāya namaḥ |
21. anekārcitāya namaḥ .
22. oṃ śivāya namaḥ .
23. oṃ siddhibuddhipriyāya namaḥ .
24. oṃ śāntāya namaḥ .
25. oṃ brahmacāriṇe namaḥ .
26. oṃ guṇeśvarāya namaḥ .
27. oṃ dvaimāturāya namaḥ .
28. oṃ munistutyāya namaḥ .
29. oṃ bhaktavighnavināśanāya namaḥ .
30. oṃ ekadantāya namaḥ .

31. oṃ caturbāhave namaḥ .
32. oṃ caturāya namaḥ .
33. oṃ śaktisaṃyutāya namaḥ .
34. oṃ lambodarāya namaḥ .
35. oṃ śūrpakarṇāya namaḥ .
36. oṃ haraye namaḥ .
37. oṃ brahmaviduttamāya namaḥ .
38. oṃ kālāya namaḥ .
39. oṃ grahapataye namaḥ .
40. oṃ kāmine namaḥ .
41. oṃ somasūryāgnilocanāya namaḥ .
42. oṃ pāśāṅkuśadharāya namaḥ .
43. oṃ caṇḍāya namaḥ .
44. oṃ guṇātītāya namaḥ .
45. oṃ nirañjanāya namaḥ .
46. oṃ akalmaṣāya namaḥ .
47. oṃ svayaṃsiddhāya namaḥ .
48. oṃ siddharcitapadāmbujāya namaḥ .
49. oṃ bījāpūraphalāsaktāya namaḥ .
50. oṃ varadāya namaḥ .
51. oṃ śāśvatāya namaḥ .
52. oṃ kṛtine namaḥ .
53. oṃ vidvatpriyāya namaḥ .
54. oṃ vītabhayāya namaḥ .
55. oṃ gadine namaḥ .
56. oṃ cakriṇe namaḥ .
57. oṃ ikṣucāpadhṛte namaḥ .
58. oṃ śrīdāya namaḥ .
59. oṃ ajāya namaḥ .
60. oṃ utpalakarāya namaḥ .
61. oṃ śrīpataye namaḥ .
62. oṃ stutiharṣatāya namaḥ . 60
63. oṃ kulādribhettre namaḥ .
64. oṃ jaṭilāya namaḥ .

65. kalikalmaṣanāśanāya namaḥ .
66. oṃ candracūḍāmaṇaye namaḥ .
67. oṃ kāntāya namaḥ .
68. oṃ pāpahāriṇe namaḥ .
69. oṃ samāhitāya namaḥ .
70. oṃ āśritaśrīkarāya namaḥ .
71. oṃ saumyāya namaḥ .
72. oṃ bhaktāvāñchitadāya namaḥ .
73. oṃ viṣṇave namaḥ .
74. oṃ kevalyasukhadāya namaḥ .
75. oṃ saccidānandavigrahāya namaḥ .
76. oṃ cintāmaṇidvīpataye namaḥ .
77. oṃ paramātmane namaḥ .
78. oṃ gajānanāya namaḥ .
79. oṃ jñānine namaḥ .
80. oṃ dayāyutāya namaḥ .
81. oṃ dāntāya namaḥ |
82. oṃ brahmadveṣavivarjitāya namaḥ .
83. oṃ pramattadaityabhayadāya namaḥ |
84. oṃ śrīkaṇṭhāya namaḥ .
85. oṃ vibudheśvarāya namaḥ .
86. oṃ rāmārcitāya namaḥ .
87. oṃ vidhaye namaḥ .
88. oṃ nāgarāyajñopavītavate namaḥ .
89. oṃ sthūlakaṇṭhāya namaḥ .
90. oṃ svayaṅkartre namaḥ .
91. oṃ sāmaghoṣapriyāya namaḥ .
92. oṃ varāya namaḥ .
93. oṃ sthūlatuṇḍāya namaḥ .
94. oṃ agraṇye namaḥ .
95. oṃ dhīrāya namaḥ .
96. oṃ vāgīśāya namaḥ .
97. oṃ siddhidāyakāya namaḥ .
98. oṃ dūrvābilvapriyāya namaḥ .

99. oṃ avyaktamūrtaye namaḥ .
100. oṃ adbhutamūrtimate namaḥ .
101. oṃ śailendratanayotsaṅgakhelanotsukhamānasāya namaḥ .
102. oṃ svalāvaṇyasudhāsārajitamanmathavigrahāya namaḥ .
103. oṃ samastajagadādhārāya namaḥ .
104. oṃ māyine namaḥ .
105. oṃ mūṣakavāhanāya namaḥ
106. oṃ hṛṣṭatuṣṭāya namaḥ .
107. oṃ prasannātmane namaḥ .
108. oṃ sarvasiddhipradāyakāya namaḥ .

.. iti śrīsiddhivināyakāṣṭottaraśatanāmāvaliḥ ..

To know the deeper meaning of the hymn your copy now

https://www.amazon.in/Hundred-Eight-Names-Ganesha-Vighneshwara/dp/B0BQG91445